Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 2 | ISSN : 2581- 6306

# संकेतितार्थनिर्णयः



**राजेश मण्डल**

**शोधच्छात्रः ,व्याकरणविभागः,**

**राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः**

**सारांशः-** सङ्केताद् एव शब्दार्थो ज्ञायते। यस्य शब्दस्य यस्मिन् सङ्केतः तस्मात् तदाऽर्थो बोधः। सङ्केतस्य बोधो कुतः व्यक्तितः जातितः वा इति विषये महान् प्रश्नो जागरितो भवति। तत्र नैयायिकादयः पृथक् पृथक् मतं ददति। अतएव विषयोऽयमाधारीकृत्य मया विचारः सारल्येन प्रस्तुतः। एवञ्च सर्वेषां मतमुपस्थाप्य वैयाकरणमतम् प्रतिष्ठितम्।

मुख्यशब्दः – सङ्केतः, शक्तिबोधः, संकेतितार्थनिर्णयः, मीमांसकाः, नैयायिकाः, अपोहवादिनः, वैयाकरणाः, बोद्धाः।

यदि सङ्केतः पदपदार्थयोरितरेतराध्यासरूपः शक्तिबोधकश्च, तर्हि सार्थकानां घटपटादीनां शब्दानां सङ्केतो जातौ व्यक्तौ वा इत्युदेति मनसि महान् प्रश्नः। गोस्तिष्ठति इत्यस्मिन् वाक्ये गोशब्दःविद्यमानपशुविशेष एव सङ्केतितो भवत्यथवा गोत्वजातौ इत्याशङ्कायां प्राचीनभारतीयदार्शनिकाः तेषां विभिन्नानि मतानि प्रतिपादयन्ति। तत्र मीमांसकाः जातौ सङ्केतवादिनः, नैयायिकाः जातिविशिष्टव्यक्तिवादिनः,बोद्धाः अपोहवादिनः, वैयाकरणाः आलङ्कारिकाश्च उपाधिवादिनः भवन्ति।

सङ्केतितार्थविषये पञ्चमतान्युपलभ्यन्ते। यथा-

1. व्यक्तिवादिनां मतं
2. जातिवादिनां मतम्
3. जातिविशिष्टव्यक्तिवादिनां मतम्
4. अपोहवादिना मतम्
5. उपाधिवादिनां मतम्

## व्यक्तौ सङ्केतवादिनां मतम्

एतेषां मते (व्यक्तौ सङ्केतवादिनां मते) शब्दस्य व्यक्तावेव सङ्केतग्रहः व्यक्तिरेव शक्यार्थो वा। तथाहि जातिरमूर्ता तस्यादृश्यत्वात्। **गामानय,गां वधान**, इत्यादिषु वाक्येषु आनयवन्धानादिक्रियादिकं व्यक्तिसङ्केतपक्षे एवोपपद्यते न तु जातिसङ्केतपक्षे। तेषां मते सङ्केतग्रहो व्यवहारधीनः। अतः तन्निर्वाहश्च (तदोचित्यञ्च) प्रवृत्तिनिवृत्तयोगाभ्यां व्यक्तावेव। अतः व्यक्तिरेव शब्दार्थः इति[i]।

**व्यक्तौ सङ्केतवादिनां मतनिरासः**

व्यक्तिसङ्केतविरोधिनः व्यक्तौ सङ्केतं न स्वीकुर्वन्ति। तेषां मते व्यक्तिरेव शब्दार्थः इति मतस्वीकरणेन तत्रैव शङ्का समुदेति यत् गोपदस्य सङ्केतः सर्वासु भूतभविष्यद्वर्तमानासु गोव्यक्तिषु आहोस्वित् एकस्यां गोव्यक्तौ उत कासुचिदेव गोव्यक्तिषु। प्रथमपक्षे आनन्त्यदोषापत्तिः। शेषपक्षद्वये व्यभिचारप्रसङ्गः।

क) तन्मते सकलव्यक्तिषु शक्तिस्वीकारे व्यक्तीनामानन्त्यात् शक्तीनामानन्त्यम्। पुनश्चैकस्माद् गोपदादनन्तानां गोव्यक्तीनां प्रतीतिरसम्भवा। असङ्ख्या हि गोव्यक्तयः पुरुषायुषाऽपि परिगणयितुं न शक्याः। अतः अनन्तशक्तिकल्पनायां गौरवात् एकस्य गोपदस्य सर्वासु भूतभविष्यद्वर्त्तमानासु गोव्यक्तिषु अर्थप्रतीतिः सम्भविष्यति। अत एव व्यक्तौ सङ्केतो न स्वीकर्तव्यः।

ख) यदि एकस्यामेव व्यक्तो ग्रहणे अन्येषां व्यक्तीनां वा तच्छब्दविषयत्वं न स्याद्। यतो हि सङ्केतस्यैव शाब्दबोधः। असङ्केतितस्य शाब्दबोधाददर्शनात्। गोशब्दस्यैकस्यामेव गोव्यक्तौ सङ्केते जाते अन्यासां गोव्यक्तीनां सङ्केतासम्भवः। परन्तु गोशब्दात् सर्वासां गवां प्रतीतिरनुभवसिद्धा। यदि असङ्केतितास्यापि अर्थस्य शब्दविशेषेण वाच्यत्वमङ्गीक्रियते तर्हि गोशब्दात् घटादीनां ग्रहो दुर्निवारः प्रसज्यते। महतीयमव्यवस्था स्यात्। एवं व्यभिचारभयात् नैकस्यां गोव्यक्तौ सङ्केतो युज्यते।

ग) तृतीयपक्षे कासुचिदेव गोव्यक्तिषु यदि सङ्केतार्थस्य समन्वयः स्यात्। तर्हि तथैव व्यभिचारापत्तिः। तथाहि कृतसङ्केतितानां कासांचिद् गोव्यक्तीनामेव बोधो भविष्यति न तु अकृतसङ्केतितानां सर्वासां बोधः। अनेन तृतीयपक्षोऽपि न समीचीनः व्यभिचारभयात्।

किञ्च व्यक्तिसङ्केतपक्षे **गौः शुक्लश्चलो डित्थः** इति विभागकरणम् अनौचित्यं भविष्यति। यतो हि **गौः शुक्लश्चलो डित्थः** इत्यस्मनि वाक्ये गोशब्दस्य गोत्वरूपा जातिः शुक्लशब्दस्य **शुक्लत्वम्**, चलशब्दस्य चलनक्रिया, डित्थशब्दस्य च डित्थ इति कश्चिन्नामरूपार्थस्य प्रतीतिर्भवति। तेन गोत्वजातिमान्, शुक्लत्वगुणवान्, चलनक्रियावान् , डित्थानामायं गौरिति ज्ञानं भवति। व्यक्तिसङ्केतविरोधवादिनां मते व्यक्तौ सङ्केतस्वीकृते सति अयं चतुर्विधो विभागः अनुपपनन्नः स्यात्। अत एव तेषां नये व्यक्तौ सङ्केतो नैव स्वीकार्यः[ii]।

## मीमांसकानां मते जातौ सङ्केतग्रहः

मीमांसकानां मते जातावेव सङ्केतग्रहो भवति[iii]। एतेषां मते शब्दार्थः प्रथमं सामान्यमथवा जातिमेव बोधयति। **गामानय** इत्यस्मिन् वाक्ये गोत्वरूपार्थः प्रथममवगम्यते। अनन्तरं जातेराक्षेपोऽर्थापत्तेरनुमानाद् वा व्यक्तिबोधः। केषाञ्चिन्मते लक्षणया व्यक्तिभानं भवतीति।

मीमांसकाः जातिं विशेषणं, व्यक्तिञ्च विशिष्टमिति कथयन्ति। विशेषणं विशिष्टमाक्षिपतीति सर्वजनसम्मतम्। विशेषणस्य विशेष्यं विनाऽसम्भवाद्। यथा शुक्लं विशेषणं गामश्वमजां वा कञ्चिद् व्यक्तिविशेष स्वोपपत्तयेऽवश्यमाक्षिपति, तथैव शब्दस्यार्थो जातिः व्यक्तिं विनाऽनुपपन्नः। **पीनो देवदत्तो दिवा न भुङ्क्ते** इत्यस्मिन् वाक्ये देवदत्तस्य दिवा भोजनाभावेऽपि रात्रिभोजनं यथाऽऽक्षिप्यते धुमं दृष्ट्वा साहचर्यसम्बन्धेन अग्नेः ग्रहणं यथा भवति तथैव यत्र यत्र घटत्वं तत्र तत्र घटः , यत्र यत्र घटाभावः तत्र न घटत्वम्। एवञ्च गोत्वमानय इत्यनेन गामानय इत्यस्य ग्रहणं भविष्यति। मण्डनमिश्रमते जातेः व्यक्तिभावं नार्थापत्त्या नाक्षेपेण अपि च लक्षणया[iv]।

मीमांसकैः जात्याकृत्योः भेदो न लक्ष्यते। तेषां मते जातिरेवाकृतिः। यथा जातिः अनेकव्यक्तिः अनुगता तथाकृतिरपि अनेकानुगता[v]।

## जातिविशिष्टव्यक्तिवादिनां मतम्

नैयायिकाः जातिविशिष्टव्यक्तिवादिनः। तेषां मते सङ्केत न जातौः न व्यक्तौ परन्तु जातिविशिष्टव्यक्तावेव। विषयेऽस्मिन् महर्षिः गौतमः प्रतिपादयति यद् पदार्थः न केवला जातिः न चाकृतिः परन्तु जातिः आकृतिः व्यक्तिश्चेति त्रितयं मिलित्वा एव पदार्थो भवति।[vi] अनेनैव कारणेन व्यक्त्याकृतिजातयस्तु पदार्थः इत्यस्मिन् सूत्रे सूत्रकारेण पदार्थपदे एकवचनस्य प्रयोगः कृतः। अत्रायमेवाशयो यत् त्रिषु एकैव शक्तिः स्वीकर्तव्या। अन्यथा पदार्थो इति बहुवचनान्तस्य प्रयोगः स्यात्। तथाहि क्वचिज्जातेः प्राधान्यं यथा **गौः पदा न स्प्रष्टव्या** इत्यत्र धर्मशास्त्रवचनानुसारे जातिर्पदार्थः। क्वचिद् व्यक्तेः प्राधान्यं यथा **गौरनुबन्ध्यः** इत्यादौ धर्मशास्त्रवाक्येषु**गामानय, गां वधान** इत्यादिषु लौकिकवाक्येषु च गोपदाद् व्यक्तिरूपार्थः प्राधान्येन प्रतीयते। कुत्रचिच्च आकृतेः प्राधान्यं यथा **मृत्तिकामय्यो गावः क्रियन्ताम्** इत्यस्मिन् वाक्ये गोपदादाकृतिरूपार्थः लभ्यते। अनेन प्रकारेण गौतमवचनानुसारेण त्रितयमेव पदार्थः साधुः सङ्गच्छते इति नैयायिकानामभिमतम्। नैयायिका मीमांसकानां केवलं जातिवादं न सहन्ते। तन्मते पदस्य योगो जातिसङ्केतयुक्तायं व्यक्तावेव भवति। संज्ञा च नैमित्तिकी। जातावेव सङ्केतग्रहणे व्यक्तेर्भानं कठिनं स्यात्[vii]।

अस्यायं निष्कर्षः लोकेऽस्मिन् गवे गोशब्दस्य प्रयोगः क्रियते। बालकाय चैत्रशब्दस्य प्रयोगः। एषा नैमित्तिकी संज्ञा यदा पदार्थान् बोधयिष्यति तदा जातिविशिष्टव्यक्तिमेव। अत एव गोशब्दो गोत्वयुक्तस्य पशुविशेषस्य चैत्रस्य चैत्रनामधेय कस्यचिद् व्यक्तिविशेषस्य ज्ञानं ज्ञास्यति। न तु गोजातेः चैत्रजातेर्वा[viii]।

पुनश्च नैयायिकानां मते मीमांसकानामिव जातेः व्यक्तिग्रहो नाक्षेपेण नानुमानेन नार्थापत्त्या। **गामानय** इति वाक्ये अर्थापत्तेराक्षेपस्य च ग्रहणं नावश्यकम्। यतो हि गवादिकर्मकताकत्वेनानयनादेरन्वयबोधस्यानवभवसिद्धत्वात्।[ix]

किञ्च गोर्गच्छति इत्यस्मिन् वाक्ये गोत्वस्य ग्रहणं यदि भविष्यति तर्हि गोत्वस्य गच्छतीत्यनेन सहान्वयो न भवति। परन्तु जातिस्तु बुद्धिगता न तु व्यवहारोपयोगिनी। अतः नैयायिकानां मते सङ्केतग्रहे जात्या सह व्यक्तेर्ग्रहणमपि भवति। अनेन जातिविशिष्टव्यक्तिरेव शक्यार्थः तेषां नये।

## वैयाकरणानां मते सङ्केतग्रहः

वैयाकरणमते सङ्केतग्रहो न केवलायां जातौ न च व्यक्तौ न वा जातिविशष्टव्यक्तौ अपि उपाधौ एव। विषयेऽस्मिन् भगवता महाभाष्ये उक्तं यत् **चतुष्टयी शब्दानां प्रवृत्तिः।जातिशब्दाः गुणशब्दाः, क्रियाशब्दाः यदृच्छाशब्दाश्चतुर्थाः**। यद्यपि व्यवहासमये प्रत्यक्षरूपेण सर्वदा व्यक्तेराविर्भावः, तथापि तस्याःउपाधौ (धर्मे) जात्यादावेव सङ्केतः स्वीकार्यः। तथा हि गोशब्दः न केवलायां जातौ सङ्केतं कारयति अपितु शुक्लादिगुणान् गुणक्रियायदृच्छाशब्देषु व्यक्तेरुपाधिष्वेव सङ्केतग्रहः। तेन द्रव्यगुणविषयविभागकरणं न विरुद्ध्यते। इत्थं भाष्यकारपतञ्जलिः चतुर्ष्वर्थेषु शब्दानां प्रवृत्तिरिति स्वीकरोति[x]।

## सङ्केतग्रहे आलङ्कारिकाणां मतम्

आलङ्कारिकाः वैयाकरणानामुपाधिवादं परिपोषयन्ति स्वशास्त्रेषु। कविराजविश्वनाथमेत **सङ्केतो गृह्यते जातौ गुणद्रव्यक्रियासु च**[xi] इति। तन्मतेऽपि **जातिः गुणः द्रव्यं क्रिया चेति चतुर्विधः शक्यार्थः**। मम्मटेनाऽपि शब्दस्योपाधावेव सङ्केतः स्वीकृतः। तन्मते यद्यपि सकलप्रयोजनसम्पादकतया प्रवृत्तिनिवृत्तियोग्या व्यक्तिरेव तथापि आनन्त्याद् व्यभिचाराच्च न तत्र सङ्केतो युक्त। गौः शुक्लश्चलो डित्थेत्यादीनां विषयविभागोऽपि न प्राप्नोति। अत एव शब्दस्योपाधावेव सङ्केतः अङ्कीकर्त्तव्यः।[xii]

तत्र उपाधिर्द्विविधः। वस्तुधर्मः, वक्तृयदृच्छासन्निवेशितः। वस्तुधर्मः इत्युक्ते वस्तुनिष्ठधर्मो जातिगुणक्रयारूपः। वस्तुधर्मोऽपि द्विविधः। सिद्धः साध्यश्चेति। सिद्धस्तावद् द्विविधः। पदार्थस्य प्राणपदः , विशेषाधानहेतुश्च। तत्र प्रथमः गवादिपदेषु प्राणधायको जातिरूपः, येन गवादीनां गोत्वमुपपन्नं भवति, यथोक्तं गोत्वाभिसम्बन्धात् गौरिति। द्वितीयः सिद्धस्तावद् विशेषाधानहेतुः(गुणः)। विशेषाधानहेतु इत्युक्ते धवलकृष्णपिङ्गलाख्य वस्तुधर्मे येन जातिर्विशिष्यते[xiii]। गोपदस्य गोत्वेऽर्थे गोत्वं प्राणपदः सिद्धो वस्तुधर्मः। परन्तु तत्रैवोपलभ्यमानाः शुक्लकृष्णत्वादिगुणाः गोत्वजातौ विशेषाधायकत्वात् शुक्लादयः गुणाः गोत्वाजातौ विशेषाधायकत्वात् शुक्लादयः गुणाः विशेषाधानहेतुः कथ्यते।

साध्यवस्तुधर्मः क्रियारूपः यदृच्छात्मकश्च [xiv]। चलनचर्वणदोहनादिक्रियारूपत्वं साध्यत्वम्। अपरञ्च यदृच्छात्मकस्यायमेवाऽर्थ यत् वक्त्रा यदृच्छया स्वस्य व्यवहारसौकर्यार्थं डित्थकपित्थादिरूपेण गवश्वादिषु यत् समारोप्यते,[xv] स वक्तृयदृच्छासन्निवेशितः। स च संज्ञारूपो नामरूपो वा। एवं गवि गोत्वशुक्लत्वचलनादयो जातिगुणक्रियारूपा उपाधयः स्वतः लभ्यन्ते। पुनश्च गवि डित्थकपित्थादयो नामानि व्यवहारसौकर्यार्थं यदृच्छात्मकं व्यपदिश्यन्ते। अयमेव वक्तृयदृच्छासन्नवेशितः उपाधिः।

इत्थं वैयाकरणालङ्कारिकाणाञ्च गोशब्दस्य गोत्वजातौ, शुक्लादिशब्दस्य गुणे चलतीत्यादिशब्दस्य क्रियायां डित्थादिपदानां नाम्नि च सङ्केतो भवति। तेन चतुष्टयी पदानां प्रवृत्तिः इत्यस्य सङ्गतिः स्यात्।

**सङ्केतग्रहे बोद्धानां मतम्**

बोद्धानां मते सङ्केतग्रहः अपोहे भवति[xvi]। अपोहञ्च पदार्थविशेषस्य तद् व्यतिरिक्तपदार्थेभ्य व्यावृतिरूपः। गौः इत्युक्ते गोभिन्नाभिन्नस्य पदार्थविशेषस्य प्रतीतिः भवतीति इति तेषामाशयः। गोशब्दोच्चारणेन सर्वासां गोव्यक्तीनां बोधः। तस्मादितरे अश्वगर्दभादयः, तेभ्यो व्यावृतिर्यत्र सोऽपोहः। अनेन प्रकारेण अपोहः एव सङ्केतितार्थः। बोद्धाः सामान्यं जातिं वा न स्वीकुर्वन्ति। तन्मते संसारेऽस्मिन् न किमपि स्थिरम्। जातौ व्यक्तौ च सङ्केतो भवितुं नार्हति। यतो हि जातिस्त्वनित्या। व्यक्तिश्च परिवर्तनशीला। अतः बोद्धानामपोह एव शब्दार्थः[xvii]।

अनेन प्रकारेण संक्षेपेणसुकुमारमतिना मया विषयोऽयं प्रतिपादितः।

---

## सन्दर्भाः

[i].प्रयोगचोदनासामञ्जस्याद् व्यक्तिः शब्दार्थः, आलम्भनविशसनप्रोक्षणादिचोदना जाता वसङ्गता भवन्ति। नहि जातिरालभ्यते विशस्यते प्रोक्ष्यते वा, अपि च षड्देया द्वादश देया चतुर्विंशतिर्देया इति न जातिः षडादिसंख्याभिर्युज्यते अपितु व्यक्तिः तस्मात् सैव शब्दार्थः।– न्यायमञ्जरी, पृ-281

[ii].तथा यदि व्यक्तावेव सङ्केतः स्यात्तदा गौः शुक्तश्चोलो डित्थादीनां विषयवभागो न प्रापनोति। तावद्विशेषणविशिष्टाया एव गो व्यक्तेः सङ्केतपात्रीकृतत्वेनैकेनैव शब्देनाभिधीयमानत्वादन्यथा शृङ्गसासानादिवैशिष्ट्येऽपि पृथक् पृथक् शब्दाभिधेयत्वं स्याद्। यदि च विषयविभागं विनाप्येकस्मिन् एव विषये युगपद् भूयसा शब्दानां प्रवृत्तिः स्यात्तादानीमिन्द्रः शक्रः पुरन्दरः इत्यादयोऽपि शब्दाः समाकालमेकस्मिन्नेव विषये प्रवर्तेरन्। तस्मान्न व्यक्तौ सङ्केतः।– अ.म. पृ-14

iii.मीमांसकास्त गवादिपदानां जातिरेव वाच्या न तु व्यक्तिः।–श.वा,पृ 285

iv .गौर्जायते गौर्नश्यति इत्यादौ सर्वत्र गोत्वादिजातिशक्तेनैव गवादिपदेन लक्षणया गोत्वादिविशिष्टा व्यक्तिर्बोध्यते। व्यक्तीनां बहुत्वेनान्यलभ्यत्वेन च तत्र शक्तेरकल्पनात् तात्पर्यानुपपत्तेरपि लक्षणायां बीजत्वात्।–श.श.प्र.पृ-87

v.जातिमेवाकृतिं प्राहुः व्यक्तिराक्रियते यया।
सामान्यं तच्च पिण्डानाकन्नबुद्धिनिबन्धना।। श्लो.वा. आकृतिवाद पृ-31

vi.व्यक्त्याकृतिजातयस्तु पदार्थः। न्यायदर्शनम्-2.2.65

vii.**जात्यावच्छिन्नसङ्केतवती नैमित्तिकी मता।**
**जातिमात्रे हि सङ्केताद् व्यक्तेर्भानं सुदुष्करम्।**---श.श.प्र.का,,25

viii .यन्नाम जात्यवच्छिन्नसङ्केतवत् सा नैमित्तिकी संज्ञा यथा गौचैत्रादिः। सा हि गोत्वचैत्रादिजात्यवच्छिन्नमेव गवादिकमभिधन्ते न तु गोत्वादिजातिमात्रम्। गोपदं गोत्वसङ्केतितमित्याकारग्रहाद् गामानायेत्यादौ गोत्वादिना गवादेरन्वयानुभवानुपपत्तेः एकशक्तत्वग्रहस्यानुभावकत्वेऽपि प्रसङ्गात्।----श.श.प्र.का-25

ix .तन्मन्दं विनाऽप्याक्षेपं गामानय इत्यादितो गवादिकर्मकताकत्वेनानयनादेरन्वयबोध्याऽनुभविकत्वाद् गौर्गच्छतीत्यादौ शुद्धे गोत्वे गच्छतीत्याद्यनुभवस्यासम्भवात् स्वाश्रयवृत्तित्वसम्बन्धेन गतिमत्वादिहेतुना गवादौ साक्षात्सम्बन्धेन गतिमत्वाद्याक्षेपस्य व्यभिचारदोषेण दुःशक्यत्वाच्च। ----तत्रैव

x.महाभाष्यम्

xi.साहित्यदर्पणम्, पृ 43

xii.यद्यप्यर्थक्रिया प्रवृत्तिनिवृत्तियोग्या व्यक्तिरेव तथाप्यनन्त्याद् व्यभिचाराच्च तत्र सङ्केतः कर्तुं न युज्यते इति गौः शुक्लः चलो डित्थ इत्यादीनां विषयविभागो न प्राप्नोतीति च तदुपाधावेव सङ्केतः। - काव्यप्रकाशः पृ-32,33

xiii.द्वितीयो गुणः। शुक्लादिना हि लब्धसत्ताकं वस्तु विशिष्यते। - काव्यप्रकाशः-पृ-34

xiv.साध्यः – पूर्वापरीभूतावयः क्रियारूपः। काव्यप्रकाशः पृ-35

xv.डित्थादिशब्दानामन्त्यबुद्धिनिर्गाह्य सहृतक्रमं स्वरूपं वक्त्रा यदृच्छया डित्थादिष्वर्थेषूपाधित्वेन सन्नवेश्यत इति सोऽयं संज्ञारूपो यदृच्छात्मक इति। - तत्रैव

xvi.गोशब्दश्रवणात् सर्वासां गोव्यक्तीनामुपस्थितौ अतस्मादश्वादितो व्यवृत्तिर्दर्शनाद् तद्व्यावृतिरूपोऽपोहो वाच्य इति बोद्धानां मतिः। - काव्यप्रकाशः, बालवोधिनी टीका पृ-35

xvii.जातेरदृष्टत्वेन विचारसहत्वात् व्यक्तेश्च क्षणिकत्वादुभयत्रापि सङ्केतस्य कर्त्तुमशक्यत्वात् गवादिशब्दानामगवादिव्यावृत्तिरूपोऽर्थः इति वैनाशकमतमित्यत्रापि व्याख्यातम्। - काव्यप्रकाशः 2.2.27

## परिशीलितग्रन्थसूची


- ❖ अष्टाध्यायी, ज्ञानभारती पाब्लिकेशन्, दिल्ली, २००९
- ❖ आनन्दवर्धनः, ध्वन्यालोकः, जगन्नाथपाठकः, चौखम्बा विद्यभवन, वाराणसी, संस्करणम् – 2001
- ❖ कुमारिलभट्ट, श्लोकवार्तिकम्गंगा सागर राय, रत्ना पाब्लिकेशन, वाराणसी
- ❖ नागेशः,वैयाकरणसिद्धान्तलघुमञ्जुषा.कृष्णदास संस्कृत सीरीज्,वाराणसी 2011
- ❖ नागेशः,परमलघुमञ्जुषा.कृष्णदास संस्कृत सीरीज्,वाराणसी 2011
- ❖ भर्त्तृहरिः, वाक्यपदीयम्, शम्भुदयालपाण्डेयः,चौखाम्बा ओरियन्टलिया, गोकुलदास संस्कृतग्रन्थमाला,दिल्ली-110007
- ❖ भामहः, काव्यालङ्कारः, चौखम्बा संस्कृत सीरिज् अफिस्, वाराणसी, 2002
- ❖ मम्मटः, काव्यप्रकाशः, “आज” भवन् सन्त कबीर मार्ग, वाराणसी(221001 यू.पी), जुलाई, 2016
- ❖ महाभाष्यम्, पतञ्जलिः, चौखम्बा कृष्णदास अकादमी, वाराणसी, २००८
- ❖ लोकमणिदाहल व्याकरणशास्त्रेतिहासः, , भारतीयविद्याप्रकाशन- वाराणसी,1990
- ❖ वामनः, काव्यालङ्कारसूत्रवृत्तिः, प्रो. केदारनाथ शर्मा, कृष्णदास अकादेमी, वारणसी – 1979
- ❖ विश्वनाथः, साहित्यदर्पणः, आचार्यः कृष्णमोहनशास्त्री, चौखम्बा संस्कृत संस्थान वाराणसी, पुनमुर्द्रण – 2013
- ❖ वैयाकरणभूषणसारः, महामहोपाध्यायश्रीकौण्डभट्टविरचितः, चौखम्बा संस्कृत सीरीज वनारस्, 1939
- ❖ श्री किशोरनाथ झा , न्यायपरिचय, चौखाम्बा विद्याभवन, वाराणसी-1
- ❖ श्रीराम शर्मा आचार्य, न्यायदर्शनम्, संस्कृतिसंस्थान,बरेलि